प्रहृतिमिन्तं तपसा स्वर्गमाप्नुयात्। तत्र दत्तं नरैः श्राद्धमनन्तफलदं भवेत्। पुष्करं नाम वै तीर्थं शालग्रामं तथैव च। शौनपातश्च विख्यातो यत्र वैश्वानरालयः। तीर्थं सारस्वतं नाम स्वामितीर्थं तथैव च। मन्दाकिनी नदी पुण्या कौशिकी चन्द्रिका तथा। विदर्भा चाप्यवेणाथ पयोष्णी प्राङ्मुखी परा। कावेरी चोत्तरागा च तथा जालन्धरो गिरिः। एतेषु श्राद्धतीर्थेषु श्राद्धमानन्त्यमश्नुते। लौहदण्डं तथा दण्डं चित्रकूटन्तथैव च। दिव्यं सर्वत्र गङ्गायास्तथा नदीतटं शुभम्। कुब्जाम्रञ्च तथा तीर्थमुर्वशीपुलिनं तथा। संसारमोचनं तीर्थं तथैव ऋणमोचनम्। एतेषु पितृतीर्थेषु श्राद्धमानन्त्यमश्नुते। अट्टहासं तथा तीर्थं गौतमेश्वरमेव च। तथा वशिष्ठतीर्थञ्च भारतञ्च ततः परम्। ब्रह्मावर्त्तं कुशावर्त्तं हंसतीर्थं तथैव च। पिण्डारकञ्च विख्यातं शङ्खोद्धारं तथैव च। खाण्डेश्वरं बिल्वकञ्च नीलपर्वतमेव च। तथा च वदरीतीर्थं रामतीर्थन्तथैव च। जयन्तं विजयञ्चैव शुक्रतीर्थं तथैव च। एतेषु श्राद्धदातारः प्रयान्ति परमं पदम्। तीर्थं मातृगृहं नाम करवीरपुरं तथा। सप्तगोदावरीतीर्थं सर्वतीर्थेश्वरेश्वरम्। तत्र श्राद्धं प्रदातव्यमनन्तफलमिच्छुभिः। कीकटेषु गया पुण्या पुण्यं राजगृहं वनम्। च्यवनस्याश्रमं पुण्यं नदी पुण्या पुनःपुना। यत्र गाथा विचरति ब्रह्मणा परिकीर्त्तिता। एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्। यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत्। एषा गाथा विचरति तीर्थेष्वायतनेषु च। सर्वे मनुष्या राजेन्द्र! कीर्त्तयन्तः समागताः। किमस्माकं कुले कश्चिद्गयां यास्यति मत्सुतः। प्रीणयिष्यति तान् गत्वा सप्त पूर्वांस्तथाऽवरान्। मातामहानामप्येवं श्रुतिरेषा चिरन्तनी। गङ्गायाञ्चास्थिनिचयं गत्वा क्षेप्स्यति मत्सुतः। तिलैः सप्ताष्टभिर्वापि दास्यते च जलाञ्जलिम्। अरण्यत्रितये चापि पिण्डदानं करिष्यति। प्रथमं पुष्करारण्यं नैमिषन्तदनन्तरम्। धर्मारण्यं ततः प्राप्य श्राद्धं भक्त्या प्रदास्यति। गयायां धर्मपृष्ठे वा सरसि ब्रह्मणस्तथा। गयाशीर्षवटे चैव पितॄणां दत्तमक्षयम्। व्रतं कुर्यान्नरो यस्तु अध्वानं परिसर्पति। नरकस्थान् पितॄंस्तद्वत् स्वर्गं नयति सत्वरः। कुले तस्य न राजेन्द्र! प्रेतो भवति कश्चन। प्रेतत्वमोक्षभावञ्च पिण्डदानाच्च गच्छति। गयायां पिण्डदानस्य नान्यत्स्थानं विशिष्यते। एकेन पिण्डदानेन तृप्तास्ते मोक्षगामिनः। धान्यप्रदानं प्रवरं वदन्ति वस्त्रप्रदानञ्च तथा मुनीन्द्राः। तोयञ्च तीर्थेषु नरैः प्रदत्तं तद्धर्महेतुं प्रवरं प्रदिष्टम्। सर्वाघहा सुरुचिरा महाबला महानदी। ये तु पश्यन्ति तां गत्वा मानसे दक्षिणोत्तरे। प्रणम्य द्विजमुख्येभ्यः प्राप्तं तैर्जन्मनः फलम्। यद्यदिच्छति वै मर्त्यस्तत्तत् प्राप्नोत्यसंशयम्। एष तूद्देशतः प्रोक्तस्तीर्थानां संग्रहो मया। वागीशोऽपि न शक्नोति विस्तरात् किमु मानुषाः” पुराणसर्वस्वे।

श्राद्धे तीर्थभेदस्य प्राशस्त्यं विष्णुसंहितायामुक्तं यथा

“अथ पुष्करेषु श्राद्धम् जप्यहोमतपांसि च। पुष्करे स्नानमात्रतः सर्वपापेभ्यः पूतो भवति। एवमेव गयाशीर्षे अक्षयवटे अमरकण्टकपर्वते वराहपर्वते यत्र क्वचन नर्मदातीरे गङ्गायां विशेषतः, कुशावर्त्ते बिल्वके नीलपर्वते कनखले कुब्जाम्रे भृगुतुङ्गे केदारे महालये नड़न्तिकायां सुगन्धायां शाकम्भर्यां फलगुतीर्थे महागङ्गायां त्रिधालिकाश्रमे कुमारधारायां प्रभासे यत्र क्वचन सरस्वत्यां विशेषतः। गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे। सततं नैमिषारण्ये वाराणस्यां विशेषतः। अगस्त्याश्रमे कौशिक्यां सरयूतीरे शोणस्य ज्योतिषायाश्च सङ्गमे। श्रीपर्वते कालोदके उत्तरमानसे वड़वायां मतङ्गवाप्यां सप्तर्षे विष्णुपदे स्वर्गमार्गपदे गोदावर्य्यां गोमत्यां वेत्रावत्यां विपाशायां वितस्तायां शतद्रुतीरे चन्द्रभागायाम् इरावत्यां सिन्धोस्तीरे दक्षिणे पञ्चनदे औशनसे। एवमादिष्वथान्येषु तीर्थेषु सरिद्वरासु सर्वेष्वपि स्वभावेषु पुलिनेषु प्रस्रवणेषु पर्वतेषु निकुञ्जेषु वनेषूपवनेषु गोमयोपलिप्तेषु मनोज्ञेषु”

तीर्थागमने दोषो यथा “अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च। अदत्त्वा काञ्चनं गाञ्च दरिद्रो नाम जायते” प्रा० त०। तीर्थगमने फलं यथा

“अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः। न तत् फलमाप्नोति तीर्थाभिगमनेन यत्। तीर्थान्यनुस्मरन् धीरः श्रद्दधानः समाहितः। कृतपापो विशुध्येत किं पुनः शुद्धकर्मकृत्। तिर्य्यग्योनिं न वै गच्छेत् कुदेशे न च जायते। न दुःखी स्यात् स्वर्गभाक् च मोक्षोपायञ्च विन्दति” ब्रह्मवै०पु०।

तीर्थसम्यक्फलभागिनो यथा “यस्य हस्तौ च पादौ